International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(2): 33-36
© 2023 IJSR
www.anantaajournal.com
Received: 18-01-2023
Accepted: 21-02-2023

**वर्षा**
शोधच्छात्रा, श्री लाल बहादुर केन्द्रीय संस्कृत विश्वविद्यालय, नवदेहली, भारत

**Corresponding Author:**
**वर्षा**
शोधच्छात्रा, श्री लाल बहादुर केन्द्रीय संस्कृत विश्वविद्यालय, नवदेहली, भारत

# वैदिकवाङ्गमये विशिष्टाद्वैतविचारः

**वर्षा**

**शोधसार**
सूक्ष्मचिदचिद्विशिष्टकारणरूपब्रह्मणः (ईश्वरस्य) स्थूलचिदचिद्विशिष्टकार्यब्रह्मणः (जीवस्य) च एकत्वप्रतिपादनमेव विशिष्टाद्वैतम् इति कथ्यते। विशिष्टाद्वैतवेदान्तस्यापि सिद्धान्तानि अपि बीजरूपेण वेदेष्वेव प्राप्यन्ते। वेदानन्तरं पुराणेषु, रामायणादिषु इतिहासग्रन्थेषु, आगमसाहित्ये, आलवारसाहित्ये च विशिष्टाद्वैतस्य सिद्धान्तानि प्राप्यन्ते।
संहिताग्रन्थेषु विशिष्टाद्वैतं प्राप्यते यथा वैदिकदर्शने सृष्टिव्यवस्थायां ईश्वरजीवप्रकृतीनां सत्ता स्वीकृता, तथैव विशिष्टाद्वैतदर्शनेऽपि जीवस्य (चित्), प्रकृतेः (अचित्), ईश्वरस्य च सत्ता स्वीकृता वर्तते। ऋग्वेदस्य पुरुषसूक्ते नासदीयसूक्ते च परमपुरुषाद् सृष्टेरुत्पत्तिवर्णनं कृतं वर्तते। एवं ब्रह्म सृष्टेः निमित्तोपादानकारणं मतं वर्तते। ऋग्वेदे तत्त्वत्रयस्य (जीवः, ब्रह्म, प्रकृतिः) अतीव सम्यक्तया विवेचना कृता वर्तते –

द्वा सुपर्णा सयुजा सखाया समानं पिप्पलं परिषस्वजाते।
तयोरन्यः पिप्प्लं स्वाद्वत्यनश्नन्नन्यो अभिचाकशीति॥

चिदात्मा, अचिज्जगत्, चिदचिद्विशिष्टं ब्रह्म इत्यादीनां विवेचनं उपनिषत्सु प्राप्यते। विशिष्टाद्वैतस्य भक्तिप्रपत्त्योरपि बीजानि उपनिषत्सु दृश्यन्ते। उपनिषत्सु आत्मतत्त्वं स्वतःसिद्धं स्वप्रकाशमयं मतं वर्तते, विशिष्टाद्वैते जीवात्मसम्बन्धिनः सिद्धान्तस्य अयमेव आधारः वर्तते। वाल्मीकिरामायणे विशिष्टाद्वैतसम्मतस्य भक्तेः स्पष्टतः वर्णनं नास्ति, परं भक्तेरवयनां चर्चा पर्याप्तरूपेण विद्यते। श्रीमद्भगवद्गीतायां भक्तिः ईश्वरप्राप्तेः एकमात्रसाधिका कथिता। गीतायां भक्तेर्यत्स्वरूपं कथितम्, तत् विशिष्टाद्वैतसम्मतमेव अस्ति। कथितं गीतायाम् –

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि युक्त्वैव मात्मानं मत्परायणः॥

इत्यनेकोपनिषद्महाभारतपुराणागमादिग्रन्थेषु विशिष्टाद्वैतस्य वर्णनं विद्यते॥

**कुटशब्दः** वैदिकवाङ्गमये विशिष्टाद्वैतविचारः, सूक्ष्मचिदचिद्विशिष्टकारणरूपब्रह्मणः, स्थूलचिदचिद्विशिष्टकार्यब्रह्मणः

**प्रस्तावना**
किं विशिष्टाद्वैतम्? कथ्यते तत्र – द्वयोर्भावः द्विता, द्विता एव द्वैतम्, न द्वैतम् अद्वैतम्, विशिष्टं विशिष्टं च विशिष्टे इति विशिष्टे, विशिष्टयोः अद्वैतम् इति विशिष्टाद्वैतम्। द्वयोरेकत्वप्रतिपादनमेव अद्वैतं कथ्यते। तत्र विशिष्टाद्वैते विशिष्टं पदार्थद्वयं वर्तते। तत्र किं विशिष्टम्? कथितम् – सूक्ष्मं चिदचित् विशिष्टं कारणब्रह्म, स्थूलं चिदचित् विशिष्टं कार्यब्रह्म, तयोरद्वैतमेव विशिष्टाद्वैतम्। तत्राधुना सूक्ष्मस्थूलयोः कार्यकारणब्रह्मणोः विवेचना क्रियते – सूक्ष्मत्वं नाम नामरूपविभागानर्हत्वम्। स्थूलन्तु नामरूपविभागार्हत्वम्। नामरूपाभ्यां विभागेन च रहितं सूक्ष्मं कथ्यते। नामरूपविभागैश्च सहितं स्थूलं कथ्यते। एवं सूक्ष्मचिदचिद्विशिष्टकारणरूपब्रह्मणः (ईश्वरस्य) स्थूलचिदचिद्विशिष्टकार्यब्रह्मणः (जीवस्य) च एकत्वप्रतिपादनमेव विशिष्टाद्वैतम् इति कथ्यते।
सर्वेषां दर्शनानां योनिः श्रुतिरिति प्रसिद्धमेव। अतः विशिष्टाद्वैतवेदान्तस्यापि सिद्धान्तानि अपि बीजरूपेण वेदेष्वेव प्राप्यन्ते। वेदानन्तरं पुराणेषु, रामायणादिषु इतिहासग्रन्थेषु, आगमसाहित्ये, आलवारसाहित्ये च विशिष्टाद्वैतस्य सिद्धान्तानि प्राप्यन्ते। तेषां वर्णनं पुरस्तात् क्रियते –

**वैदिकवाङ्मये विशिष्टाद्वैतम्**
**संहिताग्रन्थेषु विशिष्टाद्वैतम्**
वैदिकवाङ्मये संहिताग्रन्थेषु सर्वाधिकप्राचीनतमः ऋग्वेदः वर्तते। अन्येष्वपि त्रिषु वेदेषु ऋग्वेदस्य ऋचः प्राप्यन्ते। तत्र प्रथमं विशिष्टाद्वैतसिद्धान्तदृशा ऋग्वेद एव विचारयामः।

यथा वैदिकदर्शने सृष्टिव्यवस्थायां ईश्वरजीवप्रकृतीनां सत्ता स्वीकृता, तथैव विशिष्टाद्वैतदर्शनेऽपि जीवस्य (चित्), प्रकृतेः (अचित्), ईश्वरस्य च सत्ता स्वीकृता वर्तते। ऋग्वेदस्य पुरुषसूक्ते नासदीयसूक्ते च परमपुरुषाद् सृष्टेरुत्पत्तिवर्णनं कृतं वर्तते। पुरुषसूक्ते कथितं यत् परमपुरुषस्य असंख्यातानि हस्तनेत्रादीनि चांगानि सन्ति, व्याप्य च ब्रह्माण्डं स्थितो वर्तते –

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।
स भूमिं विश्वतो वृत्वात्यतिष्ठद् दशाङ्गुलम्॥[1]

नासदीयसूक्ते कथितं यत् सृष्टेः प्राक् न असद् आसीन्नैव च सत्। पृथिव्यादिलोकानाम् अन्तरिक्षस्य च सत्ता नासीत्, पुनः किम् आसीद्। कथितम् –

नासदासीन्न सदासीत्तदानीं नासीद्रजो नो व्योमापरो यत्।
किमावरीवः कुहकस्य शर्मन्नम्भः किमासीत् गहनं गभीरम्॥[2]

कथितमस्य उत्तरे यत् तदा न मृत्युरासीत्, न चामृतत्वमेव। न दिनमासीत् न च रात्रिरासीत्। तत्रैकं केवलं ब्रह्म स्वमायया अविभक्तमासीत् –

न मृत्युरासीदमृतं न तर्हि रात्र्याहनासीत्प्रकेतः।
आनीदवातं स्वधया तदेकं तस्याद्वान्यन्न परं किंचनास॥[3]

एवं ब्रह्म सृष्टेः निमित्तोपादानकारणं मतं वर्तते। ऋग्वेदे तत्त्वत्रयस्य (जीवः, ब्रह्म, प्रकृतिः) अतीव सम्यक्तया विवेचना कृता वर्तते –

द्वा सुपर्णा सयुजा सखाया समानं पिप्पलं परिषस्वजाते।
तयोरन्यः पिप्प्लं स्वाद्वत्यनश्नन्नन्यो अभिचाकशीति॥[4]

विशिष्टाद्वैते मुक्तेः साधनभूतस्य मुक्तितत्त्वस्य मूलमृग्वेद एव प्राप्यते। यज्ञादिकर्मकाण्डार्थं वैदिकऋषिभिः विभिन्नानां देवतानां कृतप्रार्थनासु एव भक्तेर्मूलं लभते। ऋचामेषां विशिष्टानुशीलनेन ज्ञायते यत् भक्तेः यस्य स्वरूपस्य वर्णनं विशिष्टाद्वैते कृतं वर्तते, संहितासु तत्स्वरूपं तु न लभते परं स्नेहातिशयेन ऋषिभिर्यथा विविधाः देवताः स्तुताः तद् भक्तेः एव अपररूपं वर्तते।[5] एताः स्तुतयः अतीवभावपूर्णास्सन्ति यत् स्तोतुः हृदयक्षेत्रे भक्तेः बीजाङ्कुरणं भवत्येव।

## ब्राह्मणग्रन्थेषु विशिष्टाद्वैतम्

यद्यपि ब्राह्मणग्रन्थेषु मन्त्राणां यज्ञादिकर्मकाण्डेषु विनियोगादीनां विधानं वर्तते, परं वेदव्याख्यारूपेण विशिष्टाद्वैतसम्मतानि दार्शनिकतत्वानि भक्तिबीजानि च पर्याप्तानि लभन्ते। एतेषु ब्राह्मणग्रन्थेषु भक्तिविषयिका विशिष्टतैका दृश्यते यत् अत्र जपस्य विधानं कृतं वर्तते, यत् भक्तेः महत्त्वपूर्णम् अंगं वर्तते। जपविधानेन ब्राह्मणग्रन्थेषु भक्तेः विकासपरम्परायाः दर्शनं भवति।

ऋग्वेदस्य ऐतरेयब्राह्मणस्य पञ्चविंशेऽध्याये ओ३म् इत्यस्य उत्पत्तिवर्णनं लभते, तस्य च सर्वोच्चसत्ता विज्ञाप्यते।[6] ब्राह्मणग्रन्थेषु यज्ञो वै विष्णुः[7] इत्युक्त्वा यज्ञः विष्णुरूपः कथितः, अस्मादेव यज्ञात् सृष्टेरुत्पत्तिवर्णनं कृतं वर्तते। ऐतरेयब्राह्मणे जपस्य महत्त्वं विधानं च वर्णितं वर्तते, यथा या देवता आहवनीया सा ध्येया। यजुर्वेदस्य शतपथब्राह्मणे याज्ञिककर्मकाण्डानामेव बहुलता वर्तते, परं भक्तेः अनिवार्यानामङ्गानां (सर्वैः सह प्रेमभावः, अद्वेष्यभावः, प्रणवादिमन्त्राणां जपः, शुचिता, दिव्यातादीनाम्) बहुत्र उल्लेखः वर्तते। शतपथब्राह्मणे जपस्य विधानं गायत्रीप्रशंसा च[8], ब्रह्मामैत्रावरुणयोः जपः[9], ओ३म् इत्यस्य जपविधानं वर्तते, तच्च सद्रूपं कथितम्।[10] प्रेम भक्तेः मुख्यं तत्त्वं वर्तते, शतपथब्राह्मणे देवानां प्रियभाजनत्वस्य चर्चा कृता।[11] देवानां प्रियभाजनत्वाय नमस्कारादीनां विधानं कृतं वर्तते।[12] अर्चना अपि नवधाभक्तेः अङ्गं वर्तते।[13] अन्यत्र भजनविधानं कृतं वर्तते।[14]

सामवेदसम्बन्धिते आर्षेयब्राह्मणे कथितं यत् अप्रमादीभूय ध्यानेन कामयमानः तन्मयभावेन प्रभुः स्तोतव्यः। स्तुतिध्याने स्पष्टतयैव भक्तेरंगानि सन्ति। सामवेदस्तु उपासनाकाण्डसम्बन्धो वर्तते। उपासना तु भक्त्यर्थिका एव। अथर्ववेदस्य गोपथब्राह्मणे प्रणवजपस्य विधानं कृतं वर्तते।[15]

## आरण्यकेषु विशिष्टाद्वैतम्

आरण्यकग्रन्थेषु ब्राह्मणादिवत् कर्मकाण्डादीनां मीमांसा न वर्तते, अपितु आध्यात्मिकतत्त्वानां मीमांसा कृता वर्तते। अरण्यानां रहसि प्रतिपादनत्वादेते आरण्यकाः कथ्यन्ते। एतेषु प्राणविद्यायाः अपि चर्चा कृता वर्तते। तात्त्विकदृष्ट्या एतेषु ग्रन्थेषु विशिष्टाद्वैतस्य सिद्धान्तानि यत्र तत्र परिलक्षितानि भवन्ति। ब्रह्म, जीव, जगदादितत्त्वानामत्र विवेचनं कृतं वर्तते, तथा च ब्रह्म परमसत्, सर्वगुणैर्युक्तं, हेयगुणैः रहितं वर्तते।

बृहदारण्यके कथितं यदपि दृश्यमानं चराचरात्मकं जगत्, तदयमात्मा इति।[16] यदयं सर्वमात्मा चेत् केन कं पश्यामः? केन कं जानीमः?[17] बृहदारण्यके ब्रह्मैव आत्मतत्त्वरूपेण व्याख्यातः। तैत्तिरीये आरण्यके कथितं यत् अनेनैव ब्रह्मणा जगदिदं धारितं वर्तते। स एव सर्वप्राणिनामन्तः प्रविश्य सर्वान् शास्ति।[18] एवं ब्रह्मणः जीवजगतोः अपृथक्त्वं प्रसिद्धमेव। बृहदारण्यके ब्रह्म आनन्दमयं कथितम्।[19] इन्द्रो मायाभिः पुरुरूप ईयते[20] इत्यादिवाक्येषु जीवात्मनः अनेकता सिद्धा। ऐतेरेयारण्यके कथितं यत् तस्य परमतत्त्वस्य संकल्पमात्रेणैव जगतः सृष्टिः जाता।[21] बृहदारण्यके ईश्वरस्य अन्तर्यामित्वस्य विशिष्टाद्वैतानुसारमेव व्याख्या कृता वर्तते, कथितं यत् पृथिव्यां स्थितोऽपि पृथिव्याः भिन्नोऽस्ति पृथिवी च यं न जानाति, परं पृथिवी तस्य शरीरं वर्तते, स आत्मा अन्तर्यामी अमरणशीलश्चास्ति।[22] एवमेव अन्यत्र कथितं यत् प्राण एव विश्वं धृतवानस्ति।[23]

आरण्यकेषु तात्त्विकविवेचनया सहैव यत्र तत्र भक्तियोगस्यापि उल्लेखः जातो वर्तते। आरण्यकेषु बहिर्योगापेक्षया अन्तर्योगः महत्त्वपूर्णः प्रदर्शितः। चित्तवृत्तिनिरोधात्मकयोगस्य प्रसारः युगेऽस्मिन् ऋषिषु पर्याप्तरूपेण जातः। अन्तर्योगबहिर्योगयोः भावनाभावितेषु अरण्यवासिषु ऋषिषु भक्तिवृक्षस्य यथायोग्यं बीजाङ्कुरणं जातं वर्तते।

## उपनिषत्सु विशिष्टाद्वैतम्

उपनिषद्ग्रन्थानि भारतीयदर्शनानां मूलस्रोतांसि सन्ति। भारतीयदर्शनानां न काऽपि विचारधारा, यस्याः उद्गमः उपनिषत्सु न स्यात्,चेत् विशिष्टाद्वैतस्यापि बीजानि अत्र लभन्ते। चिदात्मा, अचिज्जगत्, चिदचिद्विशिष्टं ब्रह्म इत्यादीनां विवेचनं उपनिषत्सु प्राप्यते। विशिष्टाद्वैतस्य भक्तिप्रपत्त्योरपि बीजानि उपनिषत्सु दृश्यन्ते। उपनिषत्सु आत्मतत्त्वं स्वतःसिद्धं स्वप्रकाशमयं मतं वर्तते, विशिष्टाद्वैते जीवात्मसम्बन्धिनः सिद्धान्तस्य अयमेव आधारः वर्तते। सर्वो जनः "अहं जानामि" इत्येवं स्वात्मानं साक्षादनुभवति। इयं "अहं" प्रतीतिः संशयस्य विषयो न, न चात्मनो निषेध एव कर्तुं शक्यते, यतोहि आत्मैव निराकर्ता वर्तते। वस्तुतः जीवस्य स्वरूपं शुद्धात्मचैतन्यं वर्तते। अयं स्वयं प्रकाशकः आनन्दरूपश्च अस्ति। यामुनाचार्योऽपि आत्मा भिन्नः सदा सुखी इत्युक्त्वा जीवस्य स्वप्रकाशकतां स्वसिद्धतां सुखरूपतां च स्वीकरोति। बृहदारण्यकोपनिषदि कथितं यत् यदिदं सर्वं, तत्सर्वमयमात्मा वर्तते।[24] उपनिषदि आत्मब्रह्मणोः अपृथक्ता सिद्धैव। माण्डूक्योपनिषदि कथितं यत् आत्मैव ब्रह्म वर्तते।[25] जीवात्मा ईश्वराद्भिन्नोऽपि अभिन्न एव, इदमेव अपृथक्त्वम्।

उपनिषत्सु तस्य परब्रह्मणः सगुणता निर्गुणता उभेऽपि वर्णिते स्तः –

एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः[26], यः सर्वज्ञः सर्ववित्[27] इत्यादिषु वाक्येषु अपहतपाप्मत्वं, अजरता अमरता, सत्यसंकल्पत्वं, सत्यकामत्वं, सर्वज्ञता, सर्वशक्तिमत्तादीनि सगुणस्य ईश्वरस्य कल्याणगुणानि कथितानि सन्ति। निर्गुणेन ब्रह्मणा तात्पर्यमिदं यत् तत् सकलप्राकृतैः हेयगुणैः रहितं वर्तते। एवं सगुणं निर्गुणञ्च ब्रह्म जगतः निमित्तोपादानकारणं कथितं वर्तते। ब्रह्मणः इदमेव रूपं विशिष्टाद्वैते स्वीकृतं वर्तते।

एवमेव उपनिषत्सु विशिष्टाद्वैतसम्मतानि भक्तिबीजानि पर्याप्तमात्रायां दृश्यन्ते। उपनिषत्सु परमपुरुषार्थस्य ब्रह्मणः प्राप्तिः कुत्रचिद् ज्ञानेन, कुत्रचिद् उपासनया, कुत्रचित्त्यागेन कुत्रचिच्च ध्यानेन कथिता वर्तते। श्वेताश्वेतरोपनिषदि तु भक्तेः स्पष्टः उल्लेखो वर्तते।[28] अस्यां श्रुतौ परमात्मनो भक्त्या सहैव गुरुभक्तेरपि प्रतिपादनं कृतं वर्तते। भक्तेः मूलस्वरः स्वात्मनोऽहम्भावं विसर्ज्य ईश्वरस्य शरणागतिः वर्तते।

रामानुजाचार्यः शरणागतिमेतां भक्तेरङ्गं स्वतंत्रोपायं च मन्यते। श्वेताश्वेतरोपनिषदि मुमुक्षोः कृते ईश्वरस्य शरणागतिः स्पष्टमेव विहिता।

अतः उपलब्धान् प्रमाणान् विवेच्य कथितुं शक्यते यत् विशिष्टाद्वैतस्य यानि सिद्धान्तानि संहिताब्राह्मणारण्यकेषु बीजरूपेण आसन्, तानि सिद्धान्तानि उपनिषत्सु अङ्कुरितानि जातानि, तानि अग्रिमकाले पल्लवितानि पुष्पितानि च।

## पुराणेषु विशिष्टाद्वैतम्

### भागवतपुराणे विशिष्टाद्वैतम्

श्रीमद्भागवतमहापुराणस्य विशिष्टाद्वैतस्य प्रभवरूपे अद्वितीयं स्थानं वर्तते। पुराणेऽस्मिन् ब्रह्म, परमात्मा, भगवत्, परमेश्वर इत्यादिसंज्ञानां सामंजस्यं स्थापयन् विशिष्टाद्वैतानुसारं तेषां व्याख्या कृता। भक्तेः उत्कर्षः यथा भागवतपुराणे प्राप्यते, नान्यत्र। भागवतपुराणस्य विचारेषु काव्यात्मकता वर्तते, परं शैली दुरूहा वर्तते।

भागवतपुराणे विशिष्टाद्वैतवदिव कथितं यत् ईश्वरः जीवस्य अन्तर्यामी वर्तते। परमेश्वरः स्वस्वरूपे पूर्णतया आकृतिरहितः शुद्धचैतन्यस्वरूपोऽस्ति, स्वकीयया चिच्छक्त्या सर्वान् जीवान् स्वात्मनि धारयति पुनश्च स्वीयया अचिच्छक्त्या भौतिकजगतः निर्माणं कृत्वा अथवा तद्रूपिणं भ्रममुत्पादयित्वा विविधानुभवार्थं जीवान् सम्बन्धितं करोति। एवमीश्वरः विशिष्टाद्वैतवत् चिदचिद्विशिष्टः वर्तते।[29] विशिष्टाद्वैतसम्मतस्य मुक्तेः साधनभूतस्य भक्तेः विकसितः रूपः पुराणेषु उपलभ्यते। भक्तिदृशा भागवतपुराणस्य महत्त्वपूर्णं स्थानं वर्तते। भागवतपुराणानुसारं मानवजीवनस्य परमं कर्तव्यं श्रीकृष्णे निर्हेतुकी विक्षेपरहिता च भक्तिर्वर्तते।[30] भक्तिरेव अन्तिमं प्राप्यं वर्तते। उत्तमभक्तः भक्त्या अतिरिक्तानां सालोक्यसार्ष्टिसामीप्यसायुज्यादीनां मुक्तीनामपि कामना न करोति।[31]

### विष्णुपुराणे विशिष्टाद्वैतम्

भागवतपुराणान्तरं वैष्णवपुराणेषु विष्णुपुराणं सर्वाधिकमहत्त्वपूर्णं वर्तते। इदमपि विशिष्टाद्वैतपरकं पुराणं वर्तते। विष्णुपुराणानुसारं ब्रह्मणः आदिमा अभिव्यक्तिः पुरुषरूपेण अभिव्यक्ता, पुनः व्यक्तस्य, अव्यक्तस्य कालस्य च अभिव्यक्तिर्मता। प्रधानव्यक्तकालादीनां मूलकारणं विष्णुरेवास्ति।[32] अयमेव परमपुरुषः नारायण इति कथ्यते। विशिष्टाद्वैतानुसारमपि जगदिदं भगवतः विष्णोः लीलायाः फलं वर्तते। भक्तेः यद्रूपं स्वोत्कर्षरूपे विशिष्टाद्वैतदर्शने दृश्यते, तद्रूपं विष्णुपुराणेऽपि सततं दृश्यते। विष्णुपुराणानुसारं मुक्तिर्यद्यपि भक्ताय काम्या न भवति, अपितु अकामयमनोऽपि भक्तः मुच्यते। मुक्तिस्तु भक्तस्य करेस्थिता इव वर्तते।[33] अग्रे इदमेव सिद्धान्तं विशिष्टाद्वैतस्य आधारभूतं जातम्।

### अन्यपुराणेषु विशिष्टाद्वैतम्

विशिष्टाद्वैतसम्मतानां सिद्धान्तानां बीजानि पद्मपुराणेऽपि परिलक्ष्यन्ते। पुराणेऽस्मिन् भक्तेः विशदं विवेचनम कृतं वर्तते। पद्मपुराणानुसारं भक्तिः सर्वपापानां नाशयित्री मुक्तिप्रदात्री चास्ति।[34] भक्तेः अनेके भेदाः पद्मपुराणे कृताः। सर्वप्रथमं मानसी, वाचिकी, कायिकी च भक्तिः कथिता, तत्पश्चात् लौकिकवैदिकाध्यात्मिकभेदानामाधारे विभक्ता।[35] आध्यात्मिकी भक्तिरपि द्विधा विभक्ता – सांख्यजा योगजा चापि।[36] एतेभ्यो भेदेभ्यः अतिरिक्ता सात्त्विकीराजसीतामसीरूपेणापि भक्तिर्विभक्ता।

शिवपुराणेऽपि विशिष्टाद्वैतसम्मतानि भक्तिबीजानि परिलक्ष्यन्ते। पुराणेऽस्मिन् माहेश्वरभक्तिर्वर्णिता। अत्रापि भक्तिर्मुक्तिसाधिका मता।[37] शिवपुराणानुसारं भक्तिः अनेकजन्मकृतानां सुकर्मणां फलस्वरूपेण उतपद्यते।[38] भक्तेरुत्पत्तिकारणं भगवत्प्रसादोऽपि भवति।[39] शिवपुराणे सेवाऽपि भक्तिं मत्वा मानसवाचिककायिकरूपैः विभक्ता।

मत्स्यपुराणे भक्तिः संसारस्य बन्धनानां नाशयित्री मोक्षस्य च साधिका अस्ति।[40] नारदीयपुराणमपि वैष्णवपुराणं वर्तते। अस्मिन् नारायणः परमसद् मतः वर्तते। परमसत् महाविष्णुः कथितः।[41] महाविष्णुः स्वविशिष्टशक्त्या जगतः रचनां करोति। यदा जगत् विष्णोः पृथक् ज्ञायते, तद् अविद्यागतदृष्ट्या भवति, ज्ञानेन विद्यया च तस्य भेदस्य नाशो भवति। भवति। वस्तुतः जगज्जीवौ विष्णोः अपृथगेव स्तः। नारदीयपुराणस्य द्वितीयेऽध्याये भक्तेरुल्लेखः श्रद्धायाः अर्थे कृतं वर्तते, जीवनस्य च सर्वकर्मसु आवश्यिका च मता वर्तते।[42]

एवमनुशीलनेन ज्ञायते यत् विशिष्टाद्वैतस्य सिद्धान्तानि न्यूनाधिकरूपेण पुराणेषु विद्यमानानि सन्ति, विशेषरूपेण भागवतपुराणे विष्णुरूपेण च। पुराणान्येतानि भक्तिशास्त्राणीव सन्ति, येषु भक्तेः सर्वेषामङ्गानां विधानं कृतं वर्तते।

## इतिहासग्रन्थेषु विशिष्टाद्वैतम्

### रामायणे विशिष्टाद्वैतम्

रामायणमहाभारतादिषु इतिहासग्रन्थेषु विशिष्टाद्वैतस्य सिद्धान्तानि उपलभ्यन्ते। एते ग्रन्थे भारतीयजनमानसे अतीव समादृतानि सन्ति। वाल्मीकेरादिकवित्वात् रामायणस्य प्राचीनता सिद्धा एव। रामायणे रामः परब्रह्मरूपे दर्शितः, विष्णुरेव देवकार्यार्थं रामस्य रूपे अवतरितवान्।[43] रामायणे राम एव उत्पत्तिस्थितिलयानां कारणभूतः इत्युक्त्वा तस्याराधाना कृता।[44] हनुमता रावणस्य पुरस्तात् रामस्य प्रभाववर्णनं रामस्य सर्वशक्तिमत्तां द्योतयति।[45] अध्यात्मरामायणेऽपि रामं विश्वस्य कारणभूतं मत्वा मायाभिर्युक्तेऽपि रामः मायया असम्पृक्तः, आनन्दघनः, स्वयं प्रकाशस्वरूपः, समस्यहेयदोषैश्च रहितः कथितः।[46] वर्णनमिदं विशिष्टाद्वैतस्य सिद्धान्तानां तुल्यमेव वर्तते।

यद्यपि वाल्मीकिरामायणे विशिष्टाद्वैतसम्मतस्य भक्तेः स्पष्टतः वर्णनं नास्ति, परं भक्तेरवयनां चर्चा पर्याप्तरूपेण विद्यते। यज्ञस्वाध्यायतपजपव्रतादीनां बहुषु स्थानेषु उल्लेखः वर्तते। भक्तेरुपादानेषु भक्तिरन्यतमा। विभीषणस्य शरणागते सति रामोऽभयं प्रदाय कथयति –

> सकृदेव प्रपन्नाय तवास्मीति च याचते।
> अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम॥[47]

### महाभारते विशिष्टाद्वैतम्

महाभारतं प्रमुखतमम् इतिहासग्रन्थं वर्तते। अत्रापि विशिष्टाद्वैतस्य तत्त्वानि बीजरूपेण कुत्रचिद् कुत्रचिद् परिलक्ष्यन्ते। भक्तेः अध्यात्मस्य च आकरग्रन्थं श्रीमद्भगवद्गीता अस्यैवाङ्गं वर्तते। अस्मिन् विशिष्टाद्वैतसम्मतस्य सर्वप्रथममवतारना कृता। श्रीमद्भगवद्गीतायां आत्मनः (चित्) प्रकृतेः (अचित्) ईश्वरस्य च व्याख्या कृता वर्तते, येषां तुलना विशिष्टाद्वैतस्य तत्त्वत्रयेण सह कर्तुं शक्यते। भक्तिः गीतायाः प्राण इव कथयितुं शक्यते। श्रीमद्भगवद्गीतायां भक्तिः ईश्वरप्राप्तेः एकमात्रसाधिका कथिता।[48] गीतायां भक्तेर्यत्स्वरूपं कथितम्, तत् विशिष्टाद्वैतसम्मतमेव अस्ति। कथितं गीतायाम्–

> मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
> मामेवैष्यसि युक्त्वैव मात्मानं मत्परायणः॥[49]

## आगमसाहित्ये विशिष्टाद्वैतम्

### पाञ्चरात्रागमे विशिष्टाद्वैतम्

रामानुजाचार्यात् प्राक् विशिष्टाद्वैतसमर्थकसम्प्रदायेषु आगमसाहित्यस्य प्रमुखं स्थानं वर्तते। एतेषु आगमसम्प्रदायेषु पाञ्चरात्र आगमम् प्राचीनसम्प्रदायमस्ति। ऋग्वेदस्य पुरुषसूक्तात् सम्बन्धत्वात् पाञ्चरात्रागमस्य प्राचीनता स्वतः सिद्धैव। आगमोऽयं समस्तानाम वैष्णवसम्प्रदायानाम् आधारस्तम्भो वर्तते। अयमागमः विशिष्टाद्वैतवेदान्तस्य पूर्वरूपो कथ्यते। अस्मिन् विशिष्टाद्वैतस्य सिद्धान्तानि मूलरूपे सन्ति। सात्वतसंहिता अस्यागमस्य महत्त्वपूर्णा संहिता वर्तते।

विशिष्टाद्वैतदर्शनपरम्परायाम्

आचार्यरामानुजप्रतिपादितसिद्धान्तानामुत्सग्रन्थानामीषत् विवरणमत्र प्रास्तूयत्। यदध्येतॄणां शोधकर्तॄणां महल्लाभाय वरीवर्त्स्यतीति दृढं विश्वसीमि।

## संदर्भ सूची

1. ऋग्वेद १०/९०/१
2. ऋग्वेद १०/१२९/१
3. ऋग्वेद १०/१२९/२
4. ऋग्वेद ७/१६४/२०
5. तं स्तोतारः पूर्व्यं यथाविद् ऋतस्य गर्भं जनुषा पिपर्तन।

आस्य जानन्तो नाम किंचिद् विविस्तन महस्ते विष्णुः सुयतिं भजामहे॥ ऋ. १/१५/३
6. ऋग्वेदस्य ऐतेरयब्राह्मणस्य
7. ब्राह्मणग्रन्थेषु यज्ञो
8. शतपथब्राह्मणम् ४/२/३/११
9. शतपथब्राह्मणम् ४/५/८/६-८
10. स वै ओ३म्। तद्धि सत्यम्। तद्देवाः विदुः। तस्माद् ओ३म् प्रतिगृह्णीयात्। श. ब्रा. ४/२/६/१२
11. अहं वः प्रियो भूयासम् इत्येव एतदाह। शतपथब्राह्मणम् २/३/२/३४
12. उप त्वाग्ने दिवे दिवे दोषावस्तर्धिया वयम्। नमो भरन्त एमसि। नमः एव असया एतत् करोति। यथा एनं न हिंस्यात्। शतपथब्राह्मणम् २/३/३/२२
13. तेऽर्चन्तः श्राम्यन्तः चेरु। शतपथब्राह्मणम् १/५/१/३
14. स ह अग्निरुवाच। मय्येव वः सर्वेभ्यो जुह्वतु, तद्धाऽहं मयि आ भजामि इति। श. ब्रा. १/५/२/२०
15. अमृतं वै प्रणवः। अमृतेनैव तत् मृत्युं तरति। ब्रह्म ह वै प्रणव ब्रह्मणा एव अस्मै तद् ब्रह्म उपसन्तनोति। गोपथब्राह्मणम् भाग २, प्रपाठक ३
16. इदं सर्वं यत्, अयमात्मा। बृहदारण्यकम् ४/४/६
17. यत्र हि द्वैतमिव भवति, तदितरं पश्यति, यत्र त्वस्य सर्वमात्मैवाभू... तत् केन कं पश्येत्, तत् केन कं विजानीयात्। बृहदारण्यकम् ४/४/१४
18. अन्तःप्रविष्टः शास्ता सर्वजनानां सर्वात्मा। तैत्तिरीयारण्यकम् ११-२०
19. विज्ञानमानन्दं ब्रह्म। बृहदारण्यकम् ५/९-२५
20. बृहदारण्यकम् ४/५/१९
21. स ईक्षत लोकान्नु सृजा इति। ऐतरेयारण्यकम् १/१/१
22. यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो, यं पृथिवी न वेद, यस्य पृथिवी शरीरं............ एष त आत्माऽन्तर्याम्यमृतः। बृहदारण्यकम् ५/७/६
23. सोऽयमाकाशः प्राणेन बृहत्याविष्टाब्धः, तद्यथायमाकाशः प्राणेन बृहत्याविष्टब्धः।
एवं सर्वाणि भूतानि आपिपीलिकाभ्यः प्राणेन बृहत्याविष्टब्धानीत्येवं विद्यात्॥ ऐतेरयारण्यकम् २/१/६
24. इदं सर्वं यत्, अयमात्मा। बृहदा. ४/४/६
25. अयमात्मा ब्रहम। माण्डूक्योपनिषद्
26. छान्दोग्योपनिषद् ८/१/५
27. मुण्डकोपनिषद् १/१/१०
28. श्वेता. ६/२३
29. अनन्ताव्यक्तरूपेण येनेदमखिलं ततम्।
चिदचिच्छक्तियुक्ताय तस्मै भगवते नमः॥ श्रीमद्भागवतमहापुराणम् ७/३/७४
30. सर्वपुंसां परो धर्मः यतो भक्तिरधीक्षजे।
अहैतुक्यप्रतिहता ययात्मा सम्प्रसीदति॥ श्रीमद्भागवतमहापुराणम् १/२/६
31. अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे।
सालोक्य सार्ष्टिसामीप्यसारूप्यैकत्वमप्युतः॥
दीयमानं न गृह्णन्ति विना मत्सेवनम जनाः॥ श्रीमद्भागवतमहापुराणम् ३/२९/१२,१३
32. प्रधानपुरुषव्यक्तकालानां चरमं हि यत्।
पश्यन्ति सूरयः शुद्धं तद्विष्णोः परमं पदम्॥ विष्णुपुराणम् १/२/१६
33. धर्मार्थकामैः किं तस्य मुक्तिर्यस्य करे स्थिता।
समस्तजगतां मूले यस्य भक्तिः स्थिरा त्वयि॥ विष्णुपुराणम् १/२०/२७
34. पद्मपुराणम् ५/८५/३
35. लौकिकी वैदिकी चापि भवेदाध्यात्मिकी तथा। पद्मपुराणम् ५/८५/५
36. सांख्यैः कृता भक्तिरेषा भक्तिराध्यात्मिकी स्मृता।
योगजापि ते भूप शृणु भक्तिं वदामि ते॥ पद्मपुराणम् ५/८५/२५
37. अन्ते भक्तिं पराम मुक्तिं वै प्राप्नुयान्नरः। शिवपुराणम् १/७८/५८
38. सहस्रजन्मपर्यन्तं तपोदानव्रतादिकम्।
कृतं पूर्वं भवेच्चेदं शिवे भक्तिः प्रजायते॥ शिवपुराणम् १/७८/३५
39. प्रसादपूर्विका येयं भक्तिः भुक्तिविधायिनी।
नैवं सा शक्यते प्राप्तुं नरेणैकेन जन्मना॥ शिवपुराणम् ५/८/२८
40. भक्तिर्भवभेदकरी मोक्षाय विनिर्मिता नाथ। मत्स्यपुराणम् १/९२/४२
41. नारदीयपुराणम् १/३/६
42. नारदीयपुराणम् २/४/१
43. वाल्मीकिरामायणम्, बालकाण्डम् १८/२६
44. वा. रा., उत्तरकाण्डम् ६/२
45. सर्वभूतान् सुसंहृत्य स भूतान् सचराचरान्।
पुनरेव तथा स्रष्टुं शक्तो रामः महायशाः॥ वा. रा., सुन्दरकाण्डम् ५१/३९
46. अध्यात्मरामायणम् १/१/२
47. वाल्मीकिरामायणम् ६/१८/३३
48. गीता ११/५४
49. गीता ९/३४